श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे

# ॥ प्रथमाष्टके पञ्चमः प्रश्नः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ प्रथमाष्टके पञ्चमः प्रश्नः ॥

अग्नेः कृत्तिकाः।
शुक्रं परस्ताज्ज्योतिरवस्तात्।
प्रजापते रोहिणी।
आपः परस्तादोषधयोऽवस्तात्।
सोमस्येन्वका विततानि।
परस्ताद्वयन्तोऽवस्तात्।
रुद्रस्य बाहू।
मृगयवः परस्ताद्विक्षारोऽवस्तात्।
अदित्यै पुनर्वसू।
वातः परस्तादार्द्रमवस्तात्॥ 1 ॥

बृहस्पतेस्तिष्यः।
जुह्वतः परस्ताद्यजमाना अवस्तात्।
सर्पाणामाश्रेषाः।
अभ्यागच्छन्तः परस्तादभ्यानृत्यन्तोऽवस्तात्।
पितृणां मघाः।
रुदन्तः परस्तादपभ्रंशोऽवस्तात्।

Please let us know of any errors in this text.

अ॒र्य॒म्णः पूर्वे॒ फल्गु॑नी।
जा॒या प॒रस्ता॑दृष॒भो॑ऽवस्ता᳚त्।
भग॒स्योत्त॑रे।
व॒ह॒तव॑ः प॒रस्ता॒द्वह॑माना अ॒वस्ता᳚त्॥ **2**॥

दे॒वस्य॑ सवि॒तुर्ह॒स्त॑ः।
प्र॒स॒वः प॒रस्ता᳚थ्स॒निर॒वस्ता᳚त्।
इन्द्र॑स्य चि॒त्रा।
ऋ॒तं प॒रस्ता᳚थ्स॒त्यम॒वस्ता᳚त्।
वा॒योर्निष्ट्या᳚ व्र॒तति॑ः।
प॒रस्ता॒दसि॑द्धिर॒वस्ता᳚त्।
इ॒न्द्रा॒ग्नि॒योर्विशा॑खे।
यु॒गानि॑ प॒रस्ता᳚त्कृ॒षमा॑णा अ॒वस्ता᳚त्।
मि॒त्रस्या॑नूरा॒धाः।
अ॒भ्या॒रोह॑त्प॒रस्ता॑द॒भ्यारू॑ढम॒वस्ता᳚त्॥ **3**॥

इन्द्र॑स्य रोहि॒णी।
शृ॒णत्प॒रस्ता᳚त्प्रतिशृ॒णद॒वस्ता᳚त्।
निर्ऋ॑त्यै मूल॒वर्ह॑णी।
प्र॒ति॒भ॒ञ्जन्त॑ः प॒रस्ता᳚त्प्रतिशृ॒णन्तो॒ऽवस्ता᳚त्।
अ॒पां पूर्वा॑ अषा॒ढाः।
वर्च॑ः प॒रस्ता॒थ्समि॑तिर॒वस्ता᳚त्।

विश्वे॑षां दे॒वाना॒मुत्त॑राः।
अ॒भि॒जय॑त्प॒रस्ता॑द॒भिजि॑तम॒वस्ता᳚त्।
विष्णो᳚ः श्रो॒णा पृ॒च्छमा॑नाः।
प॒रस्ता॒त्पन्था॑ अ॒वस्ता᳚त्॥ **4**॥

वसू॑ना॒ग्॒ श्रवि॑ष्ठाः।
भू॒तं प॒रस्ता॒द्भूति॑र॒वस्ता᳚त्।
इन्द्र॑स्य श॒तभि॑षक्।
वि॒श्वव्य॑चाः प॒रस्ता᳚द्विश्वक्षि॑तिर॒वस्ता᳚त्।
अ॒ज॒स्यैक॑पद॒ः पूर्वे᳚ प्रोष्ठप॒दाः।
वै॒श्वा॒न॒रं प॒रस्ता᳚द्वैश्वावस॒वम॒वस्ता᳚त्।
अहे᳚र्बु॒ध्निय॒स्योत्त॑रे।
अ॒भि॒षि॒ञ्चन्त॑ः प॒रस्ता॑दभिषु॒ण्वन्तो॒ऽवस्ता᳚त्।
पू॒ष्णो रे॒वती᳚।
गाव॑ः प॒रस्ता᳚द्व॒त्सा अ॒वस्ता᳚त्।
अ॒श्विनो॑रश्व॒युजौ᳚।
ग्राम॑ः प॒रस्ता᳚त्सेना॒ऽवस्ता᳚त्।
य॒मस्या॑प॒भर॑णीः।
अ॒प॒कर्ष॑न्तः प॒रस्ता॑दप॒वह॑न्तो॒ऽवस्ता᳚त्।
पू॒र्णा प॒श्चाद्यत्ते॑ दे॒वा अद॑धुः॥ **5**॥

आर्द्रमवस्ताद्बहमाना अवस्ताद्भ्यारूढमवस्तात्पन्था
अवस्ताद्बृथ्सा अवस्तात्पश्च च ॥ 1 ॥

यत्पुण्यं नक्षत्रम्।
तद्बट् कुर्वीतोपव्युषम्।
यदा वै सूर्य उदेति।
अथ नक्षत्रं नैति।
यावति तत्र सूर्यो गच्छेत्।
यत्र जघन्यं पश्येत्।
तावति कुर्वीत यत्कारी स्यात्।
पुण्याह एव कुरुते।
एवग्ं ह वै यज्ञेषुं च शतद्युम्नं च मात्थ्स्यो
निरवसाययाञ्चकार ॥ 6 ॥

यो वै नक्षत्रियं प्रजापतिं वेद।
उभयोरेनं लोकयोर्विदुः।
हस्त एवास्य हस्तः।
चित्रा शिरः।
निष्ट्या हृदयम्।
ऊरू विशाखे।
प्रतिष्ठाऽनूराधाः।
एष वै नक्षत्रियः प्रजापतिः।

य ए॒वं वेद॑।
उ॒भयो॑रेनं लो॒कयो॒र्विदुः॥ 7॥

अ॒स्मिग्ग्श्चा॒मुष्मिग्ग्॑श्च।
यां का॒मये॑त दुहि॒तरं॑ प्रि॒या स्या॒दिति॑।
तां निष्ट्या॑यां दद्यात्।
प्रि॒यैव भ॑वति।
नेव॒ तु पुन॒राग॑च्छति।
अ॒भि॒जिन्नाम॒ नक्ष॑त्रम्।
उ॒परि॑ष्टादषा॒ढाना॒म्।
अ॒वस्ता॒च्छ्रो॒णायै॒।
दे॒वा॒सु॒राः संय॑त्ता आसन्न्।
ते दे॒वास्तस्मि॒न्नक्ष॑त्रे॒ऽभ्य॑जयन्न्॥ 8॥

यद॒भ्यज॑यन्न्।
तद॑भि॒जितो॑ऽभिजि॒त्त्वम्।
यं का॒मये॑तानपज॒य्यं ज॑ये॒दिति॑।
तमे॒तस्मि॒न्नक्ष॑त्रे यातयेत्।
अ॒न॒प॒ज॒य्यमे॒व ज॑यति।
पा॒पप॑राजितमिव॒ तु।
प्र॒जाप॑तिः प॒शून॑सृजत।
ते नक्ष॑त्रं नक्षत्र॒मुपा॑तिष्ठन्त।

ते स॒माव॑न्त ए॒वाभ॑वन्न्।
ते रे॒वती॒मुपा॑तिष्ठन्त॥ **9**॥

ते रे॒वत्यां॒ प्राभ॑वन्न्।
तस्मा᳚द्रे॒वत्यां᳚ पशू॒नां कु॑र्वीत।
यत्किं चा᳚र्वा॒चीन॒ग्ं॒ सोमा᳚त्।
प्रैव भ॑वन्ति।
स॒लि॒लं वा इ॒दम॑न्त॒रासी᳚त्।
यदत॑रन्न्।
तत्तार॑काणां तारक॒त्वम्।
यो वा इ॒ह यज॑ते।
अ॒मुग्ं सलो॒कं न॑क्षते।
तन्नक्ष॑त्राणां नक्षत्र॒त्वम्॥ **10**॥

दे॒व॒गृ॒हा वै नक्ष॑त्राणि।
य ए॒वं वेद॑।
गृ॒ह्ये॑व भ॑वति।
यानि॒ वा इ॒मानि॑ पृथि॒व्याश्चि॒त्राणि॑।
तानि॒ नक्ष॑त्राणि।
तस्मा॑दश्ली॒लना॑मग्ग्श्चि॒त्रे।
नाव॑स्ये॒न्न य॑जेत।
यथा॑ पापा॒हे कु॑रु॒ते।

ता॒दृगे॒व तत्।
दे॒व॒न॒क्ष॒त्राणि॒ वा अ॒न्यानि॑॥ **11** ॥

य॒म॒न॒क्ष॒त्राण्य॒न्यानि॑।
कृत्ति॑काः प्रथ॒मम्।
विशा॑खे उत्त॒मम्।
तानि॑ देवनक्ष॒त्राणि॑।
अ॒नू॒रा॒धाः प्र॑थ॒मम्।
अ॒प॒भर॑णीरुत्त॒मम्।
तानि॑ यमनक्ष॒त्राणि॑।
यानि॑ देवनक्ष॒त्राणि॑।
तानि॒ दक्षि॑णेन॒ परि॑यन्ति।
यानि॑ यमनक्ष॒त्राणि॑॥ **12** ॥

तान्युत्त॑रेण।
अन्वे॑षामरा॒थ्स्मेति॑।
तद॑नूरा॒धाः।
ज्ये॒ष्ठमे॑षामवधि॒ष्मेति॑।
तज्ज्ये᳚ष्ठ॒घ्नी।
मूल॑मेषामवृक्षा॒मेति॑।
तन्मूं॑ल॒वर्ह॑णी।
यन्नास॑हन्त।

तदंषा॒ढाः।
यदश्लोंणत्॥ 13॥

तच्छ्रो॒णा।
यदशृंणोत्।
तच्छ्रविंष्ठाः।
यच्छ॒तमभिंषज्यन्न्।
तच्छ॒तभिंषक्।
प्रो॒ष्ठ॒प॒देषूदंयच्छन्त।
रे॒वत्यांमरवन्त।
अ॒श्व॒युजोंरयुञ्जत।
अ॒प॒भरंणी॒ष्वपांवहन्न्।
तानि॒ वा ए॒तानिं यमनक्ष॒त्त्राणिं।
यान्ये॒व देंवनक्ष॒त्त्राणिं।
तेषुं कुर्वीत यत्का॒री स्यात्।
पुण्या॒ह ए॒व कुंरुते॥ 14॥

चका॒रै॒वं वेदो॒भयोंरेनं लो॒कयोंर्विदु॒रजयन्रे॒वती॒मुपांतिष्ठन्त नक्षत्त्र॒त्वम॒न्यानि॒ यानिं यमनक्ष॒त्त्राण्यश्लोंणद्यमनक्ष॒त्त्राणि॒ त्रीणिं च॥ 2॥

दे॒वस्यं सवि॒तुः प्रा॒तः प्रं॒स॒वः प्रा॒णः।
वरुंणस्य सा॒यमांस॒वोंऽपा॒नः।
यत्प्रंती॒चीनं प्रात॒स्तनांत्।

प्राचीनग्ं सङ्गवात्।
ततो देवा अग्निष्टोमं निरमिमत।
तत्तदात्तवीर्यं निर्मार्गः।
मित्रस्य सङ्गवः।
तत्पुण्यं तेजस्व्यहः।
तस्मात्तर्हि पशवः समायन्ति।
यत्प्रतीचीनग्ं सङ्गवात्॥ **15**॥

प्राचीनं मध्यन्दिनात्।
ततो देवा उक्थ्यं निरमिमत।
तत्तदात्तवीर्यं निर्मार्गः।
बृहस्पतेर्मध्यन्दिनः।
तत्पुण्यं तेजस्व्यहः।
तस्मात्तर्हि तेक्ष्णिष्ठं तपति।
यत्प्रतीचीनं मध्यन्दिनात्।
प्राचीनमपराह्णात्।
ततो देवाः षोडशिनं निरमिमत।
तत्तदात्तवीर्यं निर्मार्गः॥ **16**॥

भगस्यापराह्णः।
तत्पुण्यं तेजस्व्यहः।
तस्मादपराह्णे कुमार्यो

भर्गमिच्छमानाश्चरन्ति।
यत्प्रतीचीनमपराह्णात्।
प्राचीनगं सायात्।
ततो देवा अतिरात्रं निरमिमत।
तत्तदात्तवीर्यं निर्मार्गः।
वरुणस्य सायम्।
तत्पुण्यं तेजस्व्यहः।
तस्मात्तर्हि नानृतं वदेत्॥ **17**॥

ब्राह्मणो वा अष्टाविगंशो नक्षत्राणाम्।
समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि।
चत्वार्यश्लीलानि।
तानि नव।
यच्च परस्तान्नक्षत्राणां यच्चावस्तात्।
तान्येकादश।
ब्राह्मणो द्वादशः।
य एवं विद्वान्संवथ्सरं व्रतं चरति।
संवथ्सरेणैवास्य व्रतं गुप्तं भवति।
समानस्याह्नः पञ्च पुण्यानि नक्षत्राणि।
चत्वार्यश्लीलानि।
तानि नव।

आ॒ग्ने॒यी रात्रिः॑।

ऐ॒न्द्रमहः॑।

तान्येका॑दश।

आ॒दि॒त्यो द्वा॑द॒शः।

य ए॒वं वि॒द्वान्सं॑वथ्स॒रं व्र॒तं चर॑ति।

सं॒व॒थ्स॒रेणै॒वास्य॑ व्र॒तं गु॒प्तं भ॑वति॥ **18**॥

स॒ङ्ग्वा॒थ्षो॑ड॒शिन॒ं निर॑मिमत॒ तत्तदात्त॑वीर्यं निर्मा॒र्गो व॑देद्भवति
समा॒नस्याह्न॒ः पञ्च॒ पुण्या॑नि॒ नक्ष॑त्राण्य॒ष्टौ च॑॥ **3**॥

ब्र॒ह्म॒वा॒दिनो॑ वदन्ति।

कति॒ पात्रा॑णि य॒ज्ञं व॑ह॒न्तीति॑।

त्रयो॑द॒शेति॑ ब्रूयात्।

स यद्ब्रू॒यात्।

कस्तानि॒ निर॑मिमी॒तेति॑।

प्र॒जाप॑ति॒रिति॑ ब्रूयात्।

स यद्ब्रू॒यात्।

कुत॒स्तानि॒ निर॑मिमी॒तेति॑।

आ॒त्मन॒ इति॑।

प्रा॒णा॒पा॒नाभ्यां॑मे॒वोपाग्ं॑श्वन्तर्या॒मौ
निर॑मिमीत॥ **19**॥

व्या॒नादु॑पाग्ं॑शु॒सव॑नम्।

वा॒च ऐ᳚न्द्रवाय॒वम्।

द॒क्ष॒क्र॒तुभ्यां᳚ मैत्रावरु॒णम्।

श्रोत्रा॑दाश्वि॒नम्।

चक्षु॑षः शु॒क्राम॒न्थिनौ᳚।

आ॒त्मन॑ आग्रय॒णम्।

अङ्गे᳚भ्य उ॒क्थ्य᳚म्।

आयु॑षो ध्रु॒वम्।

प्र॒ति॒ष्ठाया॑ ऋतुपा॒त्रे।

य॒ज्ञं वाव तं प्र॒जाप॑ति॒र्निर॑मिमीत।

स निर्मि॑तो॒ नाद्ध्रि॑यत॒ सम॑म्लीयत।

स ए॒तान्प्र॒जाप॑तिरपिवा॒पान॑पश्यत्।

तान्निर॑वपत्।

तैर्वै स य॒ज्ञमप्य॑वपत्।

यद॑पिवा॒पा भव॑न्ति।

य॒ज्ञस्य॒ धृत्या॒ अस॑म्लयाय॥ **20** ॥

उ॒पा॒ग्॒श्व॒न्त॒र्या॒मौ निर॑मिमीतामिमीत॒ षट् च॑॥ **4** ॥

ऋ॒तमे॒व प॑रमे॒ष्ठि।

ऋ॒तं नात्ये॑ति॒ किं च॒न।

ऋ॒ते स॑मु॒द्र आहि॑तः।

ऋ॒ते भूमि॑रि॒यग्ग्॒ श्रि॒ता।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा᳚।
तप॒ आक्रा᳚न्तमु॒ष्णिहा᳚।
शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना᳚स्य॒ निव॑र्तये।
स॒त्येन॒ परि॑वर्तये॥ **21** ॥

तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना᳚स्या॒भिव॑र्तये।
तदृ॒तं तथ्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेय॒ं तेन॑ राध्यासम्।
यद्ध॒र्मः प॒र्यव॑र्तयत्।
अन्ता᳚न्पृथि॒व्या दि॒वः।
अ॒ग्निरीशा॑न॒ ओज॑सा।
वरु॑णो धी॒तिभिः॑ स॒ह॥ **22** ॥

इन्द्रो॑ म॒रुद्भिः॑ सखि॑भिः स॒ह।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा᳚।
तप॒ आक्रा᳚न्तमु॒ष्णिहा᳚।

शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना᳚स्य॒ निव॑र्तये।
स॒त्येन॒ परि॑वर्तये।
तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना᳚स्या॒भिव॑र्तये॥ **23**॥

तदृ॒तं तथ्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेय॒ं तेन॑ राध्यासम्।
यो अ॒स्याः पृ॑थि॒व्यास्त्व॒चि।
नि॒व॒र्तय॒त्योष॑धीः।
अ॒ग्निरीशा॑न॒ ओज॑सा।
वरु॑णो धी॒तिभि॑ः स॒ह।
इन्द्रो॑ म॒रुद्भि॑ः सखि॑भिः स॒ह।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा᳚।
तप॒ आक्रा᳚न्तमु॒ष्णिहा᳚॥ **24**॥

शिर॒स्तप॒स्याहि॑तम्।
वै॒श्वा॒न॒रस्य॒ तेज॑सा।
ऋ॒तेना᳚स्य॒ निव॑र्तये।

स॒त्येन॒ परि॑वर्तये।
तप॑सा॒ऽस्यानु॑वर्तये।
शि॒वेना॒स्योप॑वर्तये।
श॒ग्मेना᳚स्या॒भिव॑र्तये।
तदृ॒तं तथ्स॒त्यम्।
तद्व्र॒तं तच्छ॑केयम्।
तेन॑ शकेय॒ं तेन॑ राध्यासम्॥ **25**॥

एक॒ं मास॒मुद॑सृजत्।
प॒र॒मे॒ष्ठी प्र॒जाभ्य॑ः।
तेना᳚भ्यो॒ मह॒ आव॑हत्।
अ॒मृत॒ं मर्त्या᳚भ्यः।
प्र॒जामनु॒ प्रजा॑यसे।
तदु॑ ते मर्त्या॒मृत᳚म्।
येन॒ मासा॑ अर्धमा॒साः।
ऋ॒तव॑ः परिवथ्स॒राः।
येन॒ ते ते᳚ प्रजापते।
ई॒जा॒नस्य॒ न्यव॑र्तयन्॥ **26**॥

तेना॒हम॒स्य ब्रह्म॑णा।
निव॑र्तयामि जी॒वसे᳚।
अ॒ग्निस्ति॒ग्मेन॑ शो॒चिषा᳚।

तप् आक्रान्तमुष्णिहा।
शिरस्तपस्याहितम्।
वैश्वानरस्य तेजसा।
ऋतेनास्य निवर्तये।
सत्येन परिवर्तये।
तपसाऽस्यानुवर्तये।
शिवेनास्योपवर्तये।
शग्मेनास्याभिवर्तये।
तदृतं तथ्सत्यम्।
तद्व्रतं तच्छकेयम्।
तेन शकेयं तेन राध्यासम्॥ **27**॥

परिवर्तये सहाभिर्वर्तय उष्णिहा राध्यासं
न्यवर्तयन्नुपवर्तये चत्वारि च॥ **5**॥

देवा वै यद्यज्ञेऽकुर्वत।
तदसुरा अकुर्वत।
तेऽसुरा ऊर्ध्वं पृष्ठेभ्यो नापश्यन्न्।
ते केशानग्रेऽवपन्त।
अथ श्मश्रूणि।
अथोपपक्षौ।
ततस्तेऽवाञ्च आयन्न्।

परा॑ऽभवन्न्।
यस्यै॒वं वप॑न्ति।
अवा॑ङेति॥ **28**॥

अथो॒ परै॒व भ॑वति।
अथ॑ दे॒वा ऊ॒र्ध्वं पृ॒ष्ठेभ्यो॑ऽपश्यन्न्।
त उ॑पप॒क्षावग्रे॑ऽवपन्त।
अथ॒ श्मश्रू॑णि।
अथ॒ केशान्॑।
तत॒स्ते॑ऽभवन्न्।
सु॒व॒र्गं लो॒कमा॑यन्न्।
यस्यै॒वं वप॑न्ति।
भव॑त्या॒त्मना॑।
अथो॑ सु॒व॒र्गं लो॒कमे॑ति॥ **29**॥

अथै॒तन्मनु॑र्व॒प्त्रे मि॑थु॒नम॑पश्यत्।
स श्मश्रू॒ण्यग्रे॑ऽवपत।
अथो॑पप॒क्षौ।
अथ॒ केशान्॑।
ततो॒ वै स प्राजा॑यत प्र॒जया॑ प॒शुभिः॑।
यस्यै॒वं वप॑न्ति।
प्र प्र॒जया॑ प॒शुभि॑र्मिथु॒नैर्जा॑यते।

दे॒वा॒सु॒राः संयत्ता आसन्न्।
ते सं॑वथ्स॒रे व्याय॑च्छन्त।
तान्दे॒वाश्चा॑तुर्मा॒स्यैरे॒वाभि प्रायु॑ञ्जत॥ **30**॥

वै॒श्व॒दे॒वेनं च॒तुरो॑ मा॒सो॑ऽवृञ्ज॒तेन्द्रं॑राजानः।
ताञ्छी॒र्॒षन्नि चाव॑र्तयन्त॒ परि॑ च।
व॒रु॒ण॒प्र॒घा॒सैश्च॒तुरो॑ मा॒सो॑ऽवृञ्जत॒
व॑रुणराजानः।
ताञ्छी॒र्॒षन्नि चाव॑र्तयन्त॒ परि॑ च।
सा॒क॒मे॒धैश्च॒तुरो॑ मा॒सो॑ऽवृञ्जत॒
सोम॑राजानः।
ताञ्छी॒र्॒षन्नि चाव॑र्तयन्त॒ परि॑ च।
या सं॑वथ्स॒र उ॑पजी॒वाऽऽसी॑त्।
ताम॑षामवृञ्जत।
ततो॑ दे॒वा अभ॑वन्न्।
पराऽसु॑राः॥ **31**॥

य ए॒वं वि॒द्वाग्श्चा॑तुर्मा॒स्यैर्यज॑ते।
भ्रातृ॑व्यस्यै॒व मा॒सो वृ॒क्त्वा।
शी॒र्॒षन्नि च॑ व॒र्तय॑ते॒ परि॑ च।
यैषा सं॑वथ्स॒र उ॑पजी॒वा।
वृ॒ङ्क्ते तां भ्रातृ॑व्यस्य।

क्षुधाऽस्य भ्रातृंव्यः पराभवति।
लोहितायसेन निर्वर्तयते।
यद्वा इमामग्निरृतावागते निवर्तयंति।
एतदेवैनाग्ं रूपं कृत्वा निर्वर्तयति।
सा ततः श्वः श्वो भूयंसी भवन्त्येति॥ **32** ॥

प्रजांयते।
य एवं विद्वान्लोहितायसेनं निवर्तयंते।
एतदेव रूपं कृत्वा निर्वर्तयते।
स ततः श्वः श्वो भूयान्भवंन्नेति।
प्रैव जांयते।
त्रेण्या शंलल्या निर्वर्तयेत।
त्रीणिंत्रीणि वै देवानांमृद्धानिं।
त्रीणि छन्दाग्ंसि।
त्रीणि सवंनानि।
त्रयं इमे लोकाः॥ **33** ॥

ऋद्ध्यामेव तद्वीर्यं एषु लोकेषु प्रतिंतिष्ठति।
यच्चांतुर्मास्ययाज्याँत्मनो नावद्येत्।
देवेभ्य आवृंश्च्येत।
चतृषु चंतृषु मासेषु निर्वर्तयेत।
परोक्षंमेव तद्देवेभ्यं

आ॒त्मनोऽवं॑द्य॒त्यना॑व्रस्काय।
दे॒वाना॒॑ वा ए॒ष आनी॑तः।
यश्चा॑तुर्मास्यया॒जी।
य ए॒वं वि॒द्वान्नि च॑ व॒र्तय॑ते॒ परि॑ च।
दे॒वता॑ ए॒वाप्ये॑ति।
नास्य॑ रु॒द्रः प्र॒जां प॒शू॒न॒भि म॑न्यते॥ **34**॥

एत्ये॒त्य॒यु॒ञ्ज॒तासु॑रा एति लो॒का म॑न्यते॥ **6**॥

‡ आयु॑षः प्रा॒णग्ं सन्त॑नु।
प्रा॒णाद॑पा॒नग्ं सन्त॑नु।
अ॒पा॒नाद्व्या॒नग्ं सन्त॑नु।
व्या॒नाच्चक्षुः॒ सन्त॑नु।
चक्षु॑षः॒ श्रोत्र॒ग्॒ं सन्त॑नु।
श्रोत्रा॒न्मनः॒ सन्त॑नु।
मन॑सो॒ वाच॒ग्॒ं सन्त॑नु।
वा॒च आ॒त्मा॒न॒ग्॒ं सन्त॑नु।
आ॒त्मनः॑ पृथि॒वीग्ं सन्त॑नु।
पृथि॒व्या अ॒न्तरि॑क्ष॒ग्॒ं सन्त॑नु।
अ॒न्तरि॑क्षा॒द्दिव॒ग्॒ं सन्त॑नु।
दिवः॒ सुवः॒ सन्त॑नु॥ **35**॥

अ॒न्तरि॑क्ष॒ग्॒ं सन्त॑नु द्वे च॑॥ **7**॥

इन्द्रो॑ दधी॒चो अ॒स्थभिः॑।
वृ॒त्राण्यप्र॑तिष्कुतः।
ज॒घान॑ नव॒तीर्नव॑।
इ॒च्छन्नश्व॑स्य॒ यच्छिरः॑।
पर्व॑ते॒ष्वप॑श्रितम्।
तद्वि॑दच्छर्य॒णाव॑ति।
अत्राह॒ गोरमं॑न्वत।
नाम॒ त्वष्टु॑रपी॒च्य॑म्।
इ॒त्था च॒न्द्रम॑सो गृ॒हे।
इन्द्र॒मिद्गा॒थिनो॑ बृ॒हत्॥ **36**॥

इन्द्र॑म॒र्केभि॑र॒र्किणः॑।
इन्द्रं॒ वाणी॑रनूषत।
इन्द्र॒ इद्धर्यो॒ः सचा॑।
सम्मि॑श्ल॒ आव॑चो॒ युजा॑।
इन्द्रो॑ व॒ज्री हि॑र॒ण्ययः॑।
इन्द्रो॑ दी॒र्घाय॒ चक्ष॑से।
आ सूर्यग्ं॑ रोहयद्दि॒वि।
वि गोभि॒रद्रि॑मैरयत्।
इन्द्र॒ वाजे॑षु नो अव।
स॒हस्र॑प्रधनेषु च॥ **37**॥

उ॒ग्र उ॒ग्राभि॑रू॒तिभि॑ः।

तमिन्द्रं॑ वाजयामसि।

म॒हे वृ॒त्राय॒ हन्त॑वे।

स वृषा॑ वृष॒भो भु॑वत्।

इन्द्र॒ः स दाम॑ने कृ॒तः।

ओजि॑ष्ठ॒ः स बले॑ हि॒तः।

द्यु॒म्नी श्लो॒की स सो॒म्य॑ः।

गि॒रा वज्रो॒ न सम्भृ॑तः।

सब॑लो॒ अन॑पच्युतः।

व॒व॒क्षुरु॒ग्रो अस्तृ॑तः॥ **38**॥

बृ॒हच्चास्तृ॑तः॥ **8**॥

दे॒वा॒सु॒राः संय॑त्ता आसन्।

स प्र॒जाप॑ति॒रिन्द्रं॑ ज्ये॒ष्ठं पु॒त्रमप॒ न्य॑धत्त।

नेदे॑न॒मसु॑रा॒ बली॑याग्ं सोऽहन॒न्निति॑।

प्र॒ह्लादो॑ ह॒ वै का॑याध॒वः।

वि॒रोच॑न॒ग्ग्॒ स्वं पु॒त्रमप॒ न्य॑धत्त।

नेदे॑नं दे॒वा अ॑हन॒न्निति॑।

ते दे॒वाः प्र॒जाप॑तिमुपस॒मेत्यो॑चुः।

नारा॒जक॑स्य यु॒द्धम॑स्ति।

इन्द्र॒मन्विं॑च्छा॒मेति॑।
तं य॑ज्ञक्र॒तुभि॒रन्वैं॑च्छन्न्॥ **39**॥

तं य॑ज्ञक्र॒तुभि॒र्नान्वं॑विन्दन्न्।
तमिष्टिं॑भि॒रन्वैं॑च्छन्न्।
तमिष्टिं॑भि॒रन्वं॑विन्दन्न्।
तदिष्टी॑नामिष्टि॒त्वम्।
एष्टं॑यो ह॒ वै नाम॑।
ता इष्टं॑य॒ इत्याचं॑क्षते प॒रोक्षे॑ण।
प॒रोक्षं॑प्रिया इव॒ हि दे॒वाः।
तस्मा॑ ए॒तमाँ॑ग्नावैष्ण॒वमेका॑दशकपालं
  दीक्ष॒णीय॒ं निर॑वपन्न्।
तदं॑प॒द्रुत्या॑तन्वत।
तान्पं॑त्नीसंया॒जान्त॒ उपा॑नयन्न्॥ **40**॥

ते तदं॑न्तमे॒व कृ॒त्वोदं॑द्रवन्न्।
ते प्रा॑य॒णीयं॑म॒भि स॒मारो॑हन्न्।
तदं॑प॒द्रुत्या॑तन्वत।
ताञ्छं॒य्वं॑न्त॒ उपा॑नयन्न्।
ते तदं॑न्तमे॒व कृ॒त्वोदं॑द्रवन्न्।
त आ॑ति॒त्थ्यम॒भि स॒मारो॑हन्न्।
तदं॑प॒द्रुत्या॑तन्वत।

तानिडा॒ँन्त् उपा॑नयन्न्।
ते तद॑न्तमे॒व कृ॒त्वोद॑द्रवन्न्।
तस्मा॑दे॒ता ए॒तद॑न्ता॒ इष्ट॑य॒ः सन्ति॑ष्ठन्ते॥ **41**॥

ए॒वग्ं हि दे॒वा अकु॑र्वत।
इति॑ दे॒वा अ॑कुर्वत।
इत्यु॒ वै म॑नु॒ष्या॒ँः कुर्वते।
ते दे॒वा ऊ॑चुः।
यद्वा इ॒दमु॒च्चैर्य॒ज्ञेन॒ चरा॑म।
तन्नोऽसु॑राः पा॒प्माऽनु॑विन्दन्ति।
उ॒पा॒ग्ं॒शू॒प॒सदा॑ चराम।
तथा॒ नोऽसु॑राः पा॒प्मा नानु॑वेथ्स्य॒न्तीति॑।
त उ॑पा॒ग्ं॒शू॒प॒सद॑मतन्वत।
ति॒स्र ए॒व सा॑मिधे॒नीर॒नूच्य॑॥ **42**॥

स्रु॒वेणा॑घा॒रमा॒घार्य॑।
ति॒स्रः परा॑ची॒राहु॑तीर्॒हु॒त्वा।
स्रु॒वेणो॑प॒सद॑ जु॒हु॒वाञ्च॑क्रुः।
उ॒ग्रं वचो॒ अपा॑वधीं त्वे॒षं वचो॒
 अपा॑वधी॒ग् स्वाहेति॑।
अ॒श॒न॒या॒पि॒पा॒से ह॒ वा उ॒ग्रं वच॑ः।
एन॑श्च॒ वैर॑हत्यं च त्वे॒षं वच॑ः।

ए॒तग्ं ह॒ वाव तच्च॑तुर्धा विहि॒तं पा॒प्मानं॑ दे॒वा
अप॑जघ्निरे।
तथो॑ ए॒वैतदे॑व॒ं विद्यज॑मानः।
ति॒स्र ए॒व सा॑मिधे॒नीर॒नूच्य॑।
स्रु॒वेणा॑घा॒रमा॒घार्य॥ **43**॥

ति॒स्रः परा॑ची॒राहु॑तीर्ह॒ुत्वा।
स्रु॒वेणो॑प॒सदं॑ जुहोति।
उ॒ग्रं वचो॒ अपा॑वधीं त्वे॒षं वचो॒
अपा॑वधी॒ग् स्वाहेति॑।
अ॒श॒न॒या॒पि॒पा॒से ह॒ वा उ॒ग्रं वचः॑।
एनं॑श्च॒ वैर॑हत्यं च त्वे॒षं वचः॑।
ए॒तमे॒व तच्च॑तुर्धा विहि॒तं
पा॒प्मान॒ं यज॑मा॒नोऽप॑हते।
तेऽभि॒नीयै॒वाहः॑ प॒शुमाऽलं॑भन्त।
अह्नं॑ ए॒व तद्दे॒वा अव॑र्तिं पा॒प्मानं॑
मृ॒त्युमप॑जघ्निरे।
तेना॑भि॒नीये॑व॒ रात्रेः॑ प्राचं॑रन्न्।
रात्रि॑या ए॒व तद्दे॒वा अव॑र्तिं पा॒प्मानं॑
मृ॒त्युमप॑जघ्निरे॥ **44**॥

तस्मा॑दभि॒नीयै॒वाह॑ः प॒शुमाल॑भेत।
अह्न॑ ए॒व तद्यज॑मा॒नोऽव॑र्तिं पा॒प्मान॒ं
भ्रातृ॑व्या॒नप॑नुदते।
तेना॑भि॒नीये॑व॒ रात्रे॒ः प्रच॑रेत्।
रात्रि॑या ए॒व तद्यज॑मा॒नोऽव॑र्तिं पा॒प्मान॒ं
भ्रातृ॑व्या॒नप॑नुदते।
स ए॒ष उ॑पवस॒थीयेऽह॑न्द्विदेव॒त्य॑ः
प॒शुराल॑भ्यते।
द्व॒यं वा अ॒स्मिन्लो॒के यज॑मानः।
अस्थि॑ च मा॒ग्ं॒सं च॑।
अस्थि॑ चै॒व तेन॑ मा॒ग्ं॒सं च॒ यज॑मान॒ः
सग्ग्स्कु॑रुते।
ता वा ए॒ताः पञ्च॑ दे॒वता॑ः।
अ॒ग्नीषोमा॑व॒ग्निर्मि॒त्रावरु॑णौ॥ **45**॥

प॒ञ्च॒प॒ञ्ची वै यज॑मानः।
त्वङ्मा॒ग्ं॒ सग्ग्स्नावाऽस्थि॑ म॒ज्जा।
ए॒तमे॒व तत्प॑ञ्चधा विहि॒तमा॒त्मान॑ं
वरुणपा॒शान्मु॑ञ्चति।
भे॒ष॒जता॑यै निर्वरुण॒त्वाय॑।
तग्ं स॒प्तभि॒श्छन्दो॑भिः प्रा॒तर॑ह्वयन्न्।

तस्मा॑थ्स॒प्त च॑तु॒रुत्त॒राणि॒ छन्दा॑ग्ं॒सि
प्रा॒तरनु॒वा॒केऽनू॑च्यन्ते।
तमे॒तयो॑पस॒मेत्योपा॑सीदन्न्।
उपा॑स्मै गायता नर॒ इति॑।
तस्मा॑दे॒तया॑ बहिष्पवमा॒न उ॑प॒सद्यं॑ः॥ 46॥

ऐच्छ॒न्न॒न॒य॒ग्ग॒स्ति॒ष्ठ॒न्ते॒ऽनू॒च्या॒नू॒च्यं स्रु॒वेणा॑घा॒रमा॒घार्यं॒ रात्रि॑या
ए॒व त॒द्देवा अव॑र्तिं पा॒प्मानं॑ मृ॒त्युमप॑जघ्निरे मि॒त्रावरु॑णौ॒ नवं॑ च॥ 9॥

दे॒वा यज॑मानो दे॒वा दे॒वा यज॑माना॒ यज॑मानोऽलभन्त॒ प्राच॑रन्लभेत॒
प्रच॑रे॒दाल॑भ॒न्ताल॑भेत मृ॒त्युमप॑जघ्निरे॒ भ्रातृ॑व्यान्॥

स स॑मु॒द्र उ॑त्त॒र॒तः प्राज्व॑लद्भू॒म्य॒न्तेन॑।
ए॒ष वाव स स॑मु॒द्रः।
यच्चात्वा॑लः।
ए॒ष उ॑ वे॒व स भू॑म्य॒न्तः।
यद्वे॑द्य॒न्तः।
तदे॒तत्त्रि॑श॒लं त्रि॑पू॒रु॒षम्।
तस्मा॒त्तं त्रि॑वित॒स्तं ख॑नन्ति।
स सु॑वर्णरज॒ताभ्यां॑ कुशीभ्यां॒
परि॑गृहीत आसीत्।
तं यद॒स्या अध्य॒जन॑यन्न्।
तस्मा॑दादि॒त्यः॥ 47॥

अथ॒ यथ्सु॑वर्णरज॒ताभ्याँ॑ कु॒शीभ्यां॒
 परि॑गृहीत॒ आसी॑त्।
साऽस्य॑ कौशि॒कता॑।
तं त्रि॒वृता॒ऽभि प्रास्तु॑वत।
तं त्रि॒वृताऽऽद॑दत।
तं त्रि॒वृताऽऽह॑रन्न्।
याव॑ती त्रि॒वृतो॒ मात्रा॑।
तं पं॑श्चद॒शेना॒भि प्रास्तु॑वत।
तं पं॑श्चद॒शेनाद॑दत।
तं पं॑श्चद॒शेनाह॑रन्न्।
याव॑ती पञ्चद॒शस्य॒ मात्रा॑॥ **48**॥

तग्ं स॑प्तद॒शेना॒भि प्रास्तु॑वत।
तग्ं स॑प्तद॒शेनाद॑दत।
तग्ं स॑प्तद॒शेनाह॑रन्न्।
याव॑ती सप्तद॒शस्य॒ मात्रा॑।
तस्य॑ सप्तद॒शेन॑ ह्रि॒यमा॑णस्य॒
 तेजो॒ हरो॑ऽपतत्।
तमे॑कवि॒ग्ं॒शेना॒भि प्रास्तु॑वत।
तमे॑कवि॒ग्ं॒शेनाद॑दत।
तमे॑कवि॒ग्ं॒शेनाह॑रन्न्।

यावत्येकविंशस्य मात्रा।
ते यत्त्रिवृता स्तुवते॥ 49॥

त्रिवृतैव तद्यजमानमाददते।
तं त्रिवृतैव हरन्ति।
यावती त्रिवृतो मात्रा।
अग्निर्वै त्रिवृत्।
यावद्वा अग्नेर्दहतो धूम उदेत्यानु व्येति।
तावती त्रिवृतो मात्रा।
अग्नेरेवैनं तत्।
मात्रागं सायुज्यगं सलोकतां गमयन्ति।
अथ यत्पञ्चदशेन स्तुवते।
पञ्चदशेनैव तद्यजमानमाददते॥ 50॥

तं पञ्चदशेनैव हरन्ति।
यावती पञ्चदशस्य मात्रा।
चन्द्रमा वै पञ्चदशः।
एष हि पञ्चदश्यामपक्षीयते।
पञ्चदश्यामापूर्यते।
चन्द्रमस एवैनं तत्।
मात्रागं सायुज्यगं सलोकतां गमयन्ति।
अथ यथ्सप्तदशेन स्तुवते।

स॒प्त॒द॒शेनै॒व त॒द्यज॑मान॒माद॑दते।
तग्ं स॑प्तद॒शेनै॒व ह॑रन्ति॥ **51** ॥

याव॑ती सप्तद॒शस्य॒ मात्रा᳚।
प्र॒जाप॑ति॒र्वै स॑प्तद॒शः।
प्र॒जाप॑ते॒रे॒वैन॒ं तत्।
मात्रा॒ग्॒ं सायु॑ज्यग्ं सलो॒कता᳚ं गमयन्ति।
अथ॒ यदे॑कवि॒ग्॒ंशेन॑ स्तु॒वते᳚।
ए॒क॒वि॒ग्॒ंशेनै॒व त॒द्यज॑मान॒माद॑दते।
तमे॑कवि॒ग्॒ंशेनै॒व ह॑रन्ति।
याव॑त्येकवि॒ग्॒ंशस्य॒ मात्रा᳚।
अ॒सौ वा आ॑दि॒त्य ए॑कवि॒ग्॒ंशः।
आ॒दि॒त्यस्यै॒वैन॒ं तत्॥ **52** ॥

मात्रा॒ग्॒ं सायु॑ज्यग्ं सलो॒कता᳚ं गमयन्ति।
ते कु॒श्यौ᳚।
व्य॑घ्नन्न्।
ते अ॑होरा॒त्रे अ॑भवताम्।
अह॑रे॒व सु॒वर्णा॑ऽभवत्।
र॒ज॒ता रात्रि॑ः।
स यदा॑दि॒त्य उ॒देति॑।
ए॒ताम॒व तथ्सु॒वर्णा᳚ं कु॒शीमनु॒ समे॑ति।

अथ॒ यद॑स्त॒मेति॑।
ए॒तामे॒व तद्व्र॑ज॒तां कु॒शीम॒नु॒ संवि॑शति।
प्र॒ह्लादो॑ ह॒ वै का॑याध॒वः।
वि॒रोच॑न॒ग्ग्॒ स्वं पु॒त्रमुदा᳚स्यत्।
स प्र॑द॒रो॑ऽभवत्।
तस्मा᳚त्प्रद॒राद॑ुद॒कं नाचा॑मेत्॥ **53**॥

आ॒दि॒त्यः पं॑चद॒शस्य॒ मात्रा᳚ स्तु॒वते॑ पञ्चद॒शेनै॒व तद्यज॑मान॒माद॑दते
स॒प्त॒द॒शेनै॒व ह॑रन्त्यादि॒त्यस्यै॒वैनं॒ तद्विं॑शति च॒त्वारि॑ च॥ **10**॥

ये वै च॒त्वार॒ः स्तोमा᳚ः।
कृ॒तं तत्।
अथ॒ ये पञ्च॑।
कलि॒ः सः।
तस्मा॒च्चतु॑ष्टोमः।
तच्चतु॑ष्टोमस्य चतुष्टोम॒त्वम्।
तदा॑हुः।
क॒त॒मानि॒ तानि॒ ज्योती॑ग्ंषि।
य ए॒तस्य॒ स्तोमा॒ इति॑।
त्रि॒वृत्पं॑चद॒शः स॑प्तद॒श ए॑कवि॒ग्ं॒शः॥ **54**॥

ए॒तानि॒ वाव तानि॒ ज्योती॑ग्ंषि।
य ए॒तस्य॒ स्तोमा᳚ः।

सोऽब्रवीत्।
स॒प्त॒द॒शेन॑ ह्रि॒यमा॑णो॒ व्य॑लेशिषि।
भि॒षज्य॑त॒मेति॑।
तम॒श्विनौ॑ धा॒नाभि॑रभिषज्यताम्।
पूषा क॑र॒म्भेण॑।
भार॑ती परिवा॒पेण॑।
मि॒त्रावरु॑णौ पय॒स्य॑या।
तदा॑हुः॥ **55**॥

यद॒श्विभ्यां॑ धा॒नाः।
पू॒ष्णः क॑र॒म्भः।
भार॑त्यै परिवा॒पः।
मि॒त्रावरु॑णयोः पय॒स्याऽथ॑।
कस्मा॑द॒तेषाग्ं ह॒विषा॒मिन्द्र॑मे॒व य॑ज॒न्तीति॑।
ए॒ता ह्ये॑नं दे॒वता॒ इति॑ ब्रूयात्।
ए॒तैर्ह॒विर्भि॒रभि॑षज्य॒ग्ग॒स्तस्मा॒दिति॑।
तं वस॑वो॒ऽष्टाक॑पालेन प्रातस्सव॒नेऽभिषज्यन्न्।
रु॒द्रा एका॑दशकपाले॒न माध्य॑न्दिने॒ सव॑ने।
विश्वे॑ दे॒वा द्वाद॑शकपालेन तृतीयसव॒ने॥ **56**॥

स यद॒ष्टाक॑पालान्प्रातस्सव॒ने कु॒र्यात्।
एका॑दश कपाला॒न्माध्य॑न्दिने॒ सव॑ने।

द्वादंशकपालाग्स्तृतीयसव॒ने।
विलो॑म॒ तद्य॒ज्ञस्यं क्रियेत।
एकां॑दशकपाला॒नेव प्रां॑तस्सव॒ने कुं॑र्यात्।
एकां॑दशकपाला॒न्माध्यं॑न्दिने॒ सवं॑ने।
एकां॑दशकपालाग्स्तृतीयसव॒ने।
य॒ज्ञस्यं सलोम॒त्वायं।
तदां॑हुः।
यद्वसूं॑नां प्रातस्सव॒नम्।
रु॒द्राणां॒ माध्यं॑न्दिन॒ग्ं॒ सवं॑नम्।
विश्वे॑षां दे॒वानां॑ तृतीयसव॒नम्।
अथ॒ कस्मा॑दे॒तेषाग्ं॑ ह॒विषा॒मिन्द्र॑मे॒व
यं॑ज॒न्तीति॑।
ए॒ता ह्ये॑नं दे॒वता॒ इति॑ ब्रूयात्।
ए॒तैर्ह॒विर्भि॒रभि॑षज्य॒ग्ग्॒स्तस्मा॒दिति॑॥ 57॥

ए॒क॒वि॒ग्ं॒श आं॑हुस्तृतीयसव॒ने प्रां॑तः सव॒नं पञ्चं च॥ 11॥

तस्या वां॑चोऽवपा॒दाद॑बिभयुः।
तमे॒तेषुं स॒प्तसु॒ छन्दं॑स्स्वश्रयन्न्।
यदश्रं॑यन्न्।
तच्छ्रां॑य॒न्तीयं॑स्य श्रायन्तीय॒त्वम्।
यदवां॑रयन्न्।

तद्वा॑रव॒न्तीय॑स्य वारवन्तीय॒त्वम्।
तस्या वा॑च ए॒वाव॑पा॒दाद॑बिभयुः।
तस्मा॑ ए॒तानि॑ स॒प्त च॑तुरु॒त्त॒रा॒णि॒
छन्दा॒ग्॒स्युपा॑दधुः।
तेषा॒मति॒ त्रीण्य॑रिच्यन्त।
न त्रीण्युद॑भवन्न्॥ **58**॥

स बृ॑ह॒तीमे॒वास्पृ॑शत्।
द्वाभ्या॑म॒क्षरा॓भ्याम्।
अ॒हो॒रा॒त्राभ्या॑मे॒व।
तदा॑हुः।
क॒त॒मा सा दे॒वाक्ष॑रा बृह॒ती।
यस्या॒ं तत्प्र॒त्यति॑ष्ठत्।
द्वाद॑श पौर्णमा॒स्यः॑।
द्वाद॒शाष्ट॑काः।
द्वाद॑शामावा॒स्याः॓।
ए॒षा वाव सा दे॒वाक्ष॑रा बृह॒ती॥ **59**॥

यस्या॒ं तत्प्र॒त्यति॑ष्ठ॒दिति॑।
यानि॑ च॒ छन्दा॑ग्॒स्य॒त्यरि॑च्यन्त।
यानि॑ च॒ नोदभ॑वन्न्।
तानि॒ निर्वी॓र्याणि ही॒नान्य॑मन्यन्त।

साऽब्र॑वीद्बृह॒ती।
मामे॒व भू॒त्वा।
मामुप॒ सग्ग्श्र॑य॒तेति॑।
च॒तुर्भि॑र॒क्षरै॑रनु॒ष्टुग्बृ॑ह॒तीं नोद॑भवत्।
च॒तुर्भि॑रक्ष॒रैः᳚ प॒ङ्क्तिर्बृ॑ह॒तीमत्य॑रिच्यत।
तस्या॑मे॒तानि॑ च॒त्वार्य॒क्षरा᳚ण्यप॒च्छिद्या॑दधात्॥ **60**॥

ते बृ॑ह॒ती ए॒व भू॒त्वा।
बृह॒तीमुप॒ सम॑श्रयताम्।
अ॒ष्टा॒भिर॒क्षरै॑रु॒ष्णिग्बृ॑ह॒तीं नोद॑भवत्।
अ॒ष्टा॒भिर॒क्षरै᳚स्त्रि॒ष्टुग्बृ॑ह॒तीमत्य॑रिच्यत।
तस्या॑मे॒तान्य॒ष्टाव॒क्षरा᳚ण्यप॒च्छिद्या॑दधात्।
ते बृ॑ह॒ती ए॒व भू॒त्वा।
बृह॒तीमुप॒ सम॑श्रयताम्।
द्वा॒द॒शभि॑र॒क्षरै᳚र्गाय॒त्री बृ॑ह॒तीं नोद॑भवत्।
द्वा॒द॒शभि॑र॒क्षरै॒र्जग॑ती बृह॒तीमत्य॑रिच्यत।
तस्या॑मे॒तानि॒ द्वाद॑शा॒क्षरा᳚ण्यप॒च्छिद्या॑दधात्॥ **61**॥

ते बृ॑ह॒ती ए॒व भू॒त्वा।
बृह॒तीमुप॒ सम॑श्रयताम्।
सो᳚ऽब्रवीत्प्र॒जाप॑तिः।
छन्दाग्ं॑सि॒ रथो॑ मे भवत।

युष्माभिर्हमेतमध्वानमनु सञ्चराणीति।
तस्य गायत्री च जगती च पक्षावभवताम्।
उष्णिक्च त्रिष्टुप्च प्रष्ट्यौ।
अनुष्टुप्च पङ्क्तिश्च धुर्यौ।
बृहत्येवोद्धिरभवत्।
स एतं छन्दोरथमास्थाय।
एतमध्वानमनु समचरत्।
एतग्ं ह वै छन्दोरथमास्थाय।
एतमध्वानमनु सञ्चरति।
येनैष एतथ्सञ्चरति।
य एवं विद्वान्सोमेन यजते।
य उ चैनमेवं वेद॥ **62**॥

अभवन्वाव सा देवाक्षरा बृहत्यदधाद्द्वादशाक्षराण्यपच्छिद्यादधादा स्थाय षट्च॥ **12**॥

अग्नेः कृत्तिका यत्पुण्यं देवस्य सवितुर्ब्रह्मवादिनः कत्यृतमेव
देवा वा आयुषः प्राणमिन्द्रो दधीचो देवासुराः स प्रजापतिः
स समुद्रो ये वै चत्वारस्तस्यावाचो द्वादश॥ **12**॥

अग्नेः कृत्तिका देवगृहा ऋतमेव वैश्वदेवेन ते तदन्तं तं
पञ्चदशेन ते बृहती एव द्विषष्टिः॥

अग्नेः कृत्तिका य उ चैनमेवं वेद॥

॥ हरिः ओ(३)म्॥

**॥ इति कृष्णयजुर्वेदीय तैत्तिरीय ब्राह्मणे प्रथमाष्टके पञ्चमः प्रश्नः समाप्तः॥**